[1]रुहः-रोहः, प्ररुहः-प्ररोहः, [2]पाणिरुहः[A]-भूरुहः-उर्वीरुहः-शिरोरुहः-सरोरुहम्,
[3]न्यग्रोधः, [4]वीरुत्[B], [5]विरोही-रोहिणी, [6]रोहणः, रोपः-रोहः,
[7]धान्यरोपी, रुरुक्षुः-रोरोहः;

रोढव्यम्, रोपयितव्यम्-रोहयितव्यम्, रुरुक्षितव्यम्, रोरुहितव्यम्;
रोहणीयम्, रोपणीयम्-रोहणीयम्, रुरुक्षणीयम्, रोरुहणीयम्;
रोह्यम्, रोप्यम्-रोह्यम्, रुरुक्ष्यम्, रोरुह्यम्;
ईषद्रोहः-दूरोहः-सुरोहः; — — —
रुह्यमाणः, रोप्यमाणः-रोह्यमाणः, रुरुक्ष्यमाणः, रोरुह्यमाणः;
रोहः, आरोपः-रोहः, रुरुक्षः, रोरुहः;
रोढुम्, रोपयितुम्-रोहयितुम्, रुरुक्षितुम्, रोरुहितुम्;
रूढिः, [8]रूढिः,

---

1. 'ज्वलितिकसन्तेभ्यः—' (3-1-140) इति कर्तरि वैकल्पिको णप्रत्ययः। णप्रत्ययपक्षे **रोहः** इति सम्पद्यते। तदभावपक्षे '**इगुपध**ज्ञा—' (3-1-135) इति कप्रत्यये **रुहः** इति भवति। **रुहः**=मृगविशेषः।

2. 'सुपि स्थः' (3-2-4) इत्यत्र, 'सुपि' इति योगविभागात् पाण्यादिषु सुबन्तेषूपपदेषु कर्तरि कप्रत्ययः। अत्र '**इगुपध**—' (3-1-135) इति कप्रत्यय इति **प्रक्रियाकौमुदी**। तत्र निरुपपदाधिकारात् चिन्त्यमिदम्।

3. न्यक् रोहतीति **न्यग्रोधः**=वटवृक्षः। बाहुलकात् कर्तरि घञ्। न्यङ्क्वादिषु (7-3-53) पाठात् धातुहकारस्य धकारः।

4. विविधं रोहतीति **वीरुत्**=लता। 'अन्येभ्योऽपि दृश्यते' (3-2-178) इति क्विपि, न्यङ्क्वादित्वात् (7-3-53) हकारस्य धकारः। 'अन्येषामपि दृश्यते' (6-3-137) इति दीर्घः।

5. विशेषेण रोहतीति **विरोही** तृणादयः। तद्धर्मिणि णिनिः। केवलाण्णिनिप्रत्ययेऽपि **रोही** इति भवति। तदन्तात् स्त्रियां नान्तत्वेन ङीपि **रोहिणी** इति।

6. नन्द्यादित्वात् (3-1-134) कर्तरि ल्युः। **रोहणः**=रत्नपर्वतः।

7. धान्यानि रोपयतीति **धान्यरोपी**। ण्यन्तात् णिनिः।

8. संज्ञायां क्तिच्। ढत्वष्टुत्वढलोपदीर्घाः यथालक्षणमिह बोध्याः।

A. 'पीने भटस्योरसि वीक्ष्य भुग्नान् तनुत्वचः **पाणिरुहान्** सुमध्या।' भ. का. 11-8.

B. '......**वीरुत्**तिभिर्भृङ्गकुलैररंसीत्॥' वा. वि. 3. 17.